श्रीगणेशाय नमः ॥ अथदानखंडोक्तपु
ण्याहवाचनप्रयोगः ॥ ॥ संपूज्यगंधमा
ल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्॥ धर्म्म
कर्माणिमांगल्येसंग्रामेऽद्भुतदर्शने १॥ पु
ण्याहवाचनंदैवंब्राह्मणस्यविधीयते॥ ए
तदेवनिरोंकारंकर्यात्क्षत्रियवैश्ययोः २
अवनीकृतजानुमंडलः कमलमुकुलस
दृशमंजालिंशिरस्याधायदक्षिणेनपाणि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दा० २

नासुवर्णपूर्णकलशं धारयित्वा दीर्घाना
गानद्योगिरयस्त्रीणिविष्णुपदानिचतेना
युःप्रमाणेपुण्याहंदीर्घमायुरस्तु ॥ अपा
मध्येस्थितादेवाःसर्वमप्सुप्रतिष्ठितम् ।
ब्राह्मणानांकरेन्यस्ताः शिवाआपोभ
वंतुताः॥१॥शिवाआपःसंतु। लक्ष्मीर्वस
तिपुष्पेषुलक्ष्मीर्वसतिपुष्करे ॥ सामे व
सतुवैनित्यंसौमनस्यंतथास्तुनः ॥१॥

पु० २

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सौमनस्यमस्तु ॥ अक्षतंचास्तुमेपुण्यं
दीर्घमायुर्यशोबलम् ॥ यद्यच्छ्रेयस्करं
लोकेतत्तदस्तुसदामम ॥ १ ॥ अक्षतं
चारिष्टंचास्तु ॥ ब्रह्माणानांहस्तेगंधा
दिदत्त्वा ॥ गंधःप्रदेयोदेवानामपत्यपु
ष्टिदश्चनः ॥ गंधद्वारांदुराधर्षामितिमं
त्रेणभक्तितः१॥ गंधाःपांतुसौमंगल्यंचा
स्तु ॥ पुष्पाणिपातुसौश्रेयसमस्तु ॥ अ

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

क्षताःपातुआयुष्यमस्तु।तांबूलानिपांतु
ऐश्वर्यमस्तु।दक्षिणाःपांतुआरोग्यमस्तु
दीर्घमायुः श्रेयः शांतिः पुष्टिस्तुष्टिश्चा
स्तु ॥ श्रीर्यशोविद्याविनयोवित्तंबहुपुत्र
चारोग्यंचायुष्यंचास्तु। यंकृत्वासर्ववेद
यशाक्रियाकरणकर्म्मारंभाः शुभाःशोभ
नाः प्रवर्तंतेतमहमोंकारमादिंकृत्वाऋ
ग्यजुःसामाथर्वाशीर्वचनं बह्वृषिमतंस

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मनुज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवा
चयिष्ये। वाच्यताम् । ऋक्।द्रविणोदाद्र
विणसस्तुरस्यद्रविणोदाः सनरस्याप्रियं
सत् । द्रविणोदावीरवतीमिषन्नोद्रविणो
दारासतेदीर्घमायुः ॥१॥ यजुः ॥ द्रवि
णोदाःपिपीषतिजुहोतप्रचातिष्ठत । नेष्टा
हृतुभिरिष्यत॥२॥ ऋक् ॥ सवितापश्चा
त्तात्सवितापुरस्तात्सवितो त्तरात्तात्स

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

विताधरात्तात् । सवीतानःसुवतुसर्वता
तिंसवितानोरासतांदीर्घमायुः ॥१॥ य
जुः । सवितात्वासवानर्ठ्सुवतामग्निर्गृ
हपतीनाथ्सोमोव्वनस्पतीनाम् । बृह
स्पातेर्व्वाचइंद्रोज्यैष्ठ्यायरुद्रः पशुभ्यो
मित्रःसत्योव्वरुणोधर्मपतीनाम्॥ २ ॥
ऋक् ॥ ॐ नवोनवोभवतिजायमानो
ह्नांकेतुरुषसामेत्यग्रम् ॥ भगंदेवेभ्यो

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

विदधात्यायनूप्रचंद्रमास्तिरतेदीर्घमा
युः ॥१॥ यजुः ॥ ॐनतद्रक्षाᳬसिनापि
शाचास्तरंतिदेवानामोजःप्रथमजᳬह्ये
तत् ॥ योबिभर्तिदाक्षायणᳬ हिरण्यᳬ
सदेवेषुकृणतेदीर्घमायुः समनुष्येषुकृ
णुतेदीघमायुः ॥२॥ ऋक् ॥ ॐउच्चादि
विदक्षिणावंतोअस्थुर्येअश्वदाः सहतेसू
र्येण ॥ हिरण्यदाअमृतत्वंभजंतेवासो

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दाःसोमप्रतिरंतआयुः ॥ १ ॥ यजुः ॥
उच्चातेजातमंधसोदिविसद्भूम्याददे ॥
उग्रठःशर्म्ममहिश्रवः ॥ इत्यैताऋचःपु
ण्याहेब्रूयात् ॥ व्रतानियमतपःस्वाध्याय
ऋतुदयादमदानविशिष्टानां सर्वेषां ब्रा
ह्मणानांमनःसमाधीयताम्। समाहित
मनसःस्मः । प्रसीदंतुभवंतः । प्रसन्नाः
स्मः । अथपूर्वस्थापितकलशात्ताम्रपात्रे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

जलमादाय यजमानमूर्धनिदूर्वयासेच
नंकुर्यात्। शांतिरस्तुपुष्टिरस्तुतुष्टिरस्तु
वृद्धिरस्तुऋद्धिरस्तु अविघ्नमस्तु आयु
ष्यमस्तु आरोग्यमस्तु शिवमस्तु शिवं
कर्म्मास्तु कर्मसमृद्धिरस्तु धर्मसमृद्धि
रस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु
पुत्रपौत्रसमृद्धिरस्तु धनधान्यसमृद्धि
रस्तु इष्टसंपदस्तु अनिष्टनिरसनमस्तु।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

भूमौ। यत्पापंरोगमशुभमकल्याणंतद्दू
रेप्रतिहतमस्तु। पात्रे। यद्यच्छ्रेयस्तत्त
दस्तु उत्तरेकर्मणिनिर्विघ्नमस्तु उत्तरो
त्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराः
क्रियाः शुभाः शोभनाः संपद्यंतां तिथि
करणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ति-
थिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः
प्रीयंताम्॥तिथिकरणेसमुहूर्ते सनक्षत्रे

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सग्रहे सलग्ने सदैवते प्रीयेतां दुर्गापाचा
ल्यौ प्रीयेताम् अग्निपुरोगाविश्वेदेवाः
प्रीयंताम् इन्द्रपुरोगामरुद्गणाः प्रीयंता
म् वशिष्ठपुरोगाऋषिगणाःप्रीयंतां माहे
श्वरीपुरोगा उमामातरःप्रीयंताम् अरु
न्धतीपुरोगाएकपत्न्यःप्रीयंतां विष्णुपु
रोगाः सर्वेदेवाःप्रीयंतां ब्रह्मपुरोगाःसर्वे
वेदाःप्रीयंतां आदित्यपुरोगाःसर्वग्रहाः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

प्रीयंतांब्रह्मचब्राह्मणाश्चप्रीयंताम्अंबि
कासरस्वत्यौप्रीयेताम् श्रद्धामेधेप्रीये
ताम् भगवतीकात्यायनीप्रीयताम् भग
वतीमाहेश्वरी प्रीयताम् भगवती ऋद्धि
करी प्रीयताम् भवती वृद्धिकरी प्रीय
ताम् भगवतीसिद्धिकरीप्रीयताम् भग
वतीपुष्टिकरीप्रीयताम् गवतीतुष्टिक
रीप्रीयताम् भगवंतौविघ्नविनायकौप्री

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

येताम् सर्वाःकुलदेवताःप्रीयंताम् सर्वा
ग्रमदेवताःप्रीयंतां सर्वाइष्टदेवताःप्रीयं
ताम्।भूमौ।हताश्चब्रह्मद्विषःहताश्च परि
पंथिनः हताश्चविघ्नकर्तारःशत्रवःपराभ
वंयान्तुशाम्यंतुघोराणिशाम्यंतुपापानि
शाम्यंत्वीतयः।पात्रेशुभानिवर्धंतांशिवा
आपःसंतुशिवाऋतवःसन्तु शिवाअग्न
यःसंतुशिवाआहुतयःसंतु शिवाओषध

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

यःसंतु शिवावनस्पतयःसंतुशिवाआति
थयःसंतुअहोरात्रेशिवेस्यातांऋक् । ॐ
शन्नःकनिक्रदद्देवःपर्जन्योअभिवर्षतु ॥
शन्नोद्यावापृथिवीशंप्रजाभ्यः शन्नएधि
द्विपदेशं चतुष्पदे ॥ १ ॥ यजुःशाखिनां
मंत्रः । ॐनिकामेनिकामेनःपर्जन्योवर्ष
तु फलवत्योनओषधयः पच्यंतां योग
क्षेमोनःकल्पताम् ॥ २ ॥ पूर्णपात्रे जलं

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

क्षिपेत्। शुक्रांगारकबुधबृहस्पतिशनैश्च
रराहुकेतुसोमसहिता आदित्यपुरोगाः
सर्वग्रहाःप्रीयंताम् भगवान्नारायणःप्री
यताम्भगवान्स्वामीमहासेनःप्रीयताम्
पुरोनुवाक्ययायत्पुण्यंतदस्तुयाज्यया
यत्पुण्यंतदस्तुवषट्कारेणयत्पुण्यंतद
स्तु प्रातःसर्योदयेयत्पुण्यंतदस्तु एत
त्कल्याणयुक्तं पुण्यमस्तु पुण्याहकाला

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

न्वाचायिष्ये।वाच्यताम् ॥ब्राह्मंपुण्यमह
र्यच्चसृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भ
वंनित्यंतत्पुण्याहंब्रुवंतुनः॥१॥ भोब्राह्म
णाःममसकुटुंबस्य सपरिवारस्यगृहेपु
ण्याहंभवंतोब्रुवंतु ॥३॥ ॐपुण्याहम्३॥
ऋक् ॥ ॐउद्गातेवशकुनेसामगायसि
ब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजी
शिशुमतीरपीत्यासर्वतोनः शकुनेभद्र

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मावदविश्वतोनःशकुनेपुण्यमावद ॥ य
जुः ॥ ॐपुनंतुमादेवजनाः पुनंतुमनसा
धियः ॥पुनंतुव्विश्वाभूतानिजातवेदः पु
नीहिमा ॥ २ ॥ पृथिव्यामुद्धृतायांतुय
त्कल्याणंपुराकृतम् । ऋषिभिःसिद्धगंध
र्वैस्तत्कल्याणंब्रुवंतुनः ॥ १ ॥ भोब्राह्म
णाः ममसकुटुंबस्यसपरिवारस्यगृहेक
ल्याणंभवंतोब्रुवंतु॥३॥ ॐकल्याणम् ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

॥ ३ ॥ ऋक् ॥ ॐअपासोममस्तमि
न्द्रप्रयाहिकल्याणीर्जायासुरणंगृहेते ॥
यत्रारथस्यबृहतोनिधानं विमोचनंवा
जिनोदक्षिणावत्॥९॥ यजुः॥ ॐयथेमां
वाचंकल्याणीमावदानिजनेभ्यः॥ ब्रह्म
राजन्याभ्याꣳशूद्रायचार्य्याय च स्वा
यचारणायच॥ प्रियोदेवानांदक्षिणायै
दातुरिहभूयाः समयम्मेकामःसमृद्ध्य

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

तामुपमादोनमतु ॥ २ ॥ सागरस्यतु
याऋद्धिर्महालक्ष्म्यादिभिःकृता ॥ संपू
र्णासुप्रभावाचतांतामृद्धिंब्रुवंतुनः ॥१॥
भोब्राह्मणाः ममसकुटुंबस्यसपरिवार
स्यगृहेऋद्धिंभवंतोब्रुवंतु ॥ ३ ॥ ॐऋ
द्धयताम् ॥ ३ ॥ ऋक् ॥ ॐऋद्धयाम
स्तोमंसनुयामवाजमानोमंत्रं सरथेहो
पयातम्॥ यशोनपक्वंमधुगोष्वंतराभूतां

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दा० ११

शोअश्विनोः काममप्राः ॥१॥ यजुः॥ ॐ
सत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृता
अभूम ॥ दिवंपृथिव्याअद्धयारुहामावि
दामदेवान्त्स्वर्ज्योतिः ॥२॥ स्वस्तिस्तु
याऽविनाशाख्यापुण्यकल्याणवृद्धिदा ।
विनायकप्रियानित्यंतांतांस्वास्तिंब्रुवंतु
नः ॥ १ ॥ भोब्राह्मणाः ममसकुटंबस्य
सपरिवारस्यगृहेस्वस्तिभवंतोब्रुवंतु ॥

पु० ११

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

॥ ३ ॥ ॐस्वस्ति ॥ ३ ॥ ऋक् ॥ ॐस्व
स्तिऋद्धिप्रपथे श्रेष्ठारेक्णस्वत्यभिया
वाममेति ॥ सानो अमासोअरणेनिपातु
स्वावेशाभवतुदेवगोपाः ॥ १ ॥ यजुः ॥
ॐस्वस्तिनइन्द्रोवृद्धश्रवाः स्वस्तिनः पू
षाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअ
रिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥
॥ २ ॥ मृकंडसूनोरायुर्यदध्रुवलोमशयो

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दा० १२

स्तथा ॥ आयुषातेनसंयुक्ताजीवेमशर
दःशतम् ॥ १ ॥ जीवंतुभवंतः ॥ ऋक्
ॐ शतंजीवशरदोवर्द्धमानः शतंहेमंता
न्छतमुवसंतान् ॥ शतमिंद्राग्नीसवि
ताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ॥
॥१॥ यजुः॥ ॐशतमिन्नुशरदोअंतिदेवा
यत्रानश्चक्राजरसंतनूनाम् ॥ पुत्रासो
यत्रपितरोभवंति मानोमध्यारीरिषता

पु० १२

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

युर्गतोः ॥ २ ॥ शिवगौरीविवाहेयाया
श्रीरामेनृपात्मजे ॥ धनदस्यगृहेयाश्री
रस्माकंसास्तुसद्मनि ॥ १ ॥ भोब्राह्म
णाःममसकुटुंबस्यसपरिवारस्यगृहेश्री
रस्त्वितिभवंतोब्रुवंतु ॥ ३ ॥ ॐअस्तु
श्रीः॥ ३ ॥ऋक्॥ ॐश्रियेजातःश्रियआ
निरियायश्रियंवयोजरितृभ्योदधाति ॥
श्रियंवसानाअमृतत्वमायन्भवंति स

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दा०
१३

त्यासमिथामितद्रौ॥१॥ यजुः॥ ॐमन
सःकाममाकूतिंवाचःसत्यमशीमयि ॥
पशूनाठं रूपमन्नस्यरसोयशः श्रीः श्र
यताम्मयिस्वहा ॥ २ ॥प्रजापतिर्लोक
पालोधाताब्रह्मासदेवराट्॥ भगवाञ्छा
श्वतोनित्यंसनोरक्षतुसर्वतः ॥ १ ॥ भग
वान्प्रजापतिःप्रीयताम् ॥ ऋक् ॥ ॐप्र
जापत नत्वदेतान्यन्यो विश्वाजातानि

पु०

१३

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पारिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नो
अस्तुवयंस्यामपतयोरयीणाम् ॥ १ ॥
यजुः ॥ ॐप्रजापतेनत्वदेतन्न्यान्योवि
श्वारूपाणिपारिताबभूव ॥ यत्कामास्ते
जुहुमस्तन्नो अस्त्वयममुष्वपितासाव
स्यपितावयꣳस्यामपतयो रयीणाꣳ
स्वहा॥२॥ आयुष्मतेस्वस्तिमतेयजमा
नायदाशुषे॥ कृताःसर्वाशिषःसंतुऋत्वि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ग्भिर्वेदपारगैः ॥१॥ देवेन्द्रस्ययथास्व
स्तियथास्वस्तिगुरोर्गृहे ॥ एकलिंगेय
थास्वस्तिस्तथास्वस्तिःसदामम ॥२॥
ॐआयुष्मतेस्वस्ति॥३॥ ऋक् ॥ ॐस्व
स्तयेवायुमुपब्रवामहै सोमंस्वस्तिभुव
नस्ययस्पतिः॥ बृहस्पतिंसर्वगणंस्वस्त
येस्वस्तयआदित्यासोभवंतुनः ॥ १ ॥
यजुः॥ ॐप्रतिपन्थामपद्महि स्वस्तिगा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मनेहसम् ॥ येनविश्वाःपरिद्विषोवृणक्ति
विन्दतेवसु ॥ २ ॥ऋक्॥ ॐमहोअग्ने
समिधानस्यर्म्मण्यनागा मित्रे वरुणे
स्वस्तये। श्रेष्ठेस्यामसवितुःसवीमनित
द्देवानामवोअद्यावृणीमहे ॥१॥ यजुः ॥
ॐविश्वानिदेवसवितर्दुरितानिपरासुव॥
यद्भद्रंतन्नआसुव ॥ मंत्रार्थाःसफलाः
संतुपूर्णाःसंतुमनोरथाः ॥ शत्रूणांबुद्धि

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

नाशोस्तुमित्राणामुदयोस्तुनः।१।ऋग्वे
दोथयजुर्वेदः सामवेदोह्यथर्वणः॥ब्रह्मव
क्रेस्थितानित्यंनिघ्नंतुतवशात्रवान्।२॥
अक्षतान्विप्रहस्तात्तुनित्यंगृह्णन्ति येन
राः॥ चत्वारितेषांवर्धंतेआयुःकीर्तिर्य
शोबलम्॥३॥ श्रीर्वचस्वमायुष्यमारो
ग्य०॥४॥ धनवान्पुत्रवाँल्लक्ष्मीवान्भव।
इतिदानखंडोक्तंपुण्याहवाचनंसंपूर्णम्।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi